This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२

श्रीगणेशाय नमः ॥ शिवां गणाकृतिं विघ्नघ्नं हेमपत्रप्रोल्लासहेतुमम्लानं नवसंरक्तं यः ॥ कुमेरुध्यजलनिध्येविमुगासिद्धचं

हमन्वहंमानतोस्मि ॥ १ ॥ चिकित्साशास्त्रसिद्धांतजिज्ञासावरिवर्तिचेतसां ॥ अभ्यासः क्रियतां नर्हि बुधाः संज्ञासमुच्चये ॥ २ ॥ वायुः पित्तं

कफश्चेति त्रयो दोषाः समासतः ॥ समा तिष्ठन्ते देहस्य विषमा व्यपरेतवः ॥ ३ ॥ प्राणादिभेदास्तांश्चात्मा वायुः प्राणोत्र मूर्द्धगः ॥ ४ ॥

कंठचरो बुद्धिहृदयेंद्रियचित्तधृक् ॥ ष्ठीवनक्षवथूद्गारनिःश्वासान्नप्रवेशकृत् ॥ उरः स्थानमुदानस्य नासानाभिगलांश्च

रेत् ॥ ५ ॥ वाक्प्रवृत्तिप्रयत्नौजोबलवर्णस्मृतिक्रियः ॥ व्यानो हृदि स्थितः कृत्स्नदेहचारी महाजवः ॥ ६ ॥ गत्यपक्षेपणोत्क्षेपनिमेषो

न्मेषणादिकाः ॥ प्रायः सर्वाः क्रियास्तस्मिन्प्रतिबद्धाः शरीरिणां ॥ ७ ॥ समानोग्निसमीपस्थः कोष्ठे चरति सर्वतः ॥ अन्नं गृह्णाति

पचति विवेचयति मुंचति ॥ ८ ॥ अपानोपानगः श्रोणिबस्तिमेढ्रोरुगोचरः ॥ शुक्रार्तवशकृन्मूत्रगर्भनिःक्रमणक्रियः ॥ ९ ॥ पित्तं पं

चात्मकं तत्र पक्वामाशयमध्यगं ॥ पंचभूतात्मकत्वेपि यत्तैजसगुणोदयात् ॥ १० ॥ त्यक्तद्रवत्वं पाकादिकर्मणानलशब्दितं ॥ पच

त्यन्नं विभजते सारकिट्टौ पृथक् तथा ॥ ११ ॥ तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहं ॥ करोति बलदानेन पाचकं नाम तत्स्मृतं ॥

१२ ॥ आमाशयाश्रयं पित्तं रंजकं रसरंजनात् ॥ बुद्धिमेधाभिमानाद्यैरभिप्रेतार्थसाधनात् ॥ १३ ॥ साधकं हृद्गतं पित्तं रूपालोच

नतः स्मृतं ॥ दृक्स्थमालोचकं त्वक्स्थं भ्राजकं भ्राजनात्त्वचः ॥ १४ ॥ श्लेष्मा तु पंचधोरस्थः सत्रिकस्य स्ववीर्यतः ॥ हृदयस्यान्न

Acc. No. ~~11040~~ M-1878
Title - संज्ञासमुच्चय
Author - शिवदत्त मिश्र
Date - संवत् 1812.
Sub - आयुर्वेद
folio - 17.
Xerox - 33.
K K S U LIBRARY RAMTEK 441 106 M-1878 Dist. Nagpur
Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चेतनस्य ग्रवांतुकर्म्मणा॥ ७॥ कफधाम्नां विशेषाणां यत्कोपे त्वपवत्तंवनं॥ अतो व संघके श्लेष्मायत्त्वामाशये संस्थितः॥ ८॥ क्लेदकः
सोन्नसंघातक्लेदनात् स्नेहनाद्रसबोधनात्॥ बोधको रसनास्थायी शिरःसंस्थोऽक्षतर्पणात्॥ ९॥ तर्पकः संधिसंश्लेषणात् श्लेषकः संधिषु
स्थितः॥ संसर्गः सन्निपातश्च तद्द्वित्रिक्षयकोपतः॥ १०॥ दोषसाम्यं च प्रकृतिर्वैकृतामाभेदोनुबंधारपि चानुबंधान्॥ तथा प्रकृति
प्रकृतिस्त्वयोगात्तथाश्रयाकर्षवशाद्गतम्॥ ११॥ वर्णीशब्दशंते स्तु वातादेः प्राकृतः क्रमात्॥ वैकृतोन्योनुबंधस्तु स्वतंत्रस्पष्ट
लक्षणः॥ १२॥ यथाप्रोक्तसमुत्थानप्रशमोन्योनुबंधकः॥ वातप्रकोपे वातरोगो ज्ञेयः प्रकृतिसंज्ञकः॥ १३॥ एवं च पित्तकफयोर्विकृति
स्तु न तथा मता॥ यदा स्थानात्स्थितं पित्तमाकृष्य बलाश्रया बलः॥ १४॥ स्थानान्तरं नयति तत्स्थानं द्वि विकारकृत्॥ स्थानान्तरेहि
लिस्थानात्तत्र स्वे स्थानमानयेत्॥ १५॥ संचयश्च प्रकोपश्च प्रसरः स्थानसंश्रयः॥ व्यक्तिर्भेदश्च विज्ञेयाः षडेवता नाडीनां गतिः स्मृता॥
॥ १६॥ यो वै वृद्धिः स्वधाम्न्येव कोपस्तु स्थानगामिता॥ परस्थायप्रवेशस्तु प्रसरस्तेनु क्रमः॥ १७॥ समानान्गुणान् विद्धि विपरीत
गुणास्तु ... त्यद्यते हीनमध्याढ्यभावैर्यथाक्रमं॥ १८॥ अनिलस्य स्थानानि तत्स्थानसमाप्तिश्च चतुर्थिका॥ पूर्वरूपाश्रयं दोष
लिंगं समस्तासमद्भवेत्॥ १९॥ व्यक्तिः स्यादोगानां पूर्वं व्यक्तिलक्षणं स्यात्तु जायते॥ रूपं तेन स्मृतं रोगभेदश्च षष्ठस्तेः॥ २०॥ साम
त्वाद्यैर्यथाकोपं दि ... सानननुबध्नती॥ क्षयः स्थानं च वृद्धिश्च विज्ञेया त्रिविधा गतिः॥ २१॥ ऊर्ध्वाधश्च तिर्यक्च विज्ञेया त्रिवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धायरा॥ त्रिविधाः॥ चापरा शाखा कोष्ठमर्मास्थिसंधयः॥ २॥ साखा रक्तादयस्त्वक्च बाह्यरोगायनं हि सा॥ तदाश्रया मषव्यंगगंडा
लज्यर्बुदादयः॥ ३॥ बहिर्भागाश्च दुर्नामगुल्मशोफादयो गदाः॥ अंतःकोष्ठो महास्रोत आमपक्वाशयाश्रयः॥ ३१॥ तत्स्था
नातिछर्द्यतीसार कास स्वास उदर ज्वराः॥ अंतर्भागं च शोफार्शो गुल्मवीसर्पविद्रधि॥ ३२॥ शिरो हृदय बस्त्यादि मर्माण्यस्थ्नां
तु संधयः॥ तन्निबद्धाः सिरास्नायुकंडराद्याश्च मध्यमः॥ ३३॥ रोगमार्गास्थितास्तत्र यक्ष्मपक्षवधार्दिताः॥ मूर्द्धादिरोगाः सं
ध्यस्थि त्रिकग्रहादयः॥ ३४॥ पृथक् त्रीन विद्धि संसर्गे त्रिधानत्र तु तान्नव॥ त्रीनिव समयाद्व्याधावेकैकमतिशायि
ने॥ ३६॥ त्रयोदशसमस्तेषु षड्द्व्येकातिशायनेन तु॥ एकं तुल्याधिकैः षट् च तारतम्यविकल्पनात्॥ ३७॥ पंचविंशतिरित्येवं वृ
द्धैः क्षीणैश्च तावतः॥ एकैकवृद्धिसमताक्षयैः षट् ते पुनश्च षट्॥ ३८॥ एकक्षयद्वन्द्ववृद्ध्या सविपर्यययापि ते॥ तथा द्विषष्टि
निर्दिष्टा त्रिषष्टिः स्वास्थ्यकारणम्॥ ३९॥ रजस्तमश्च मनसो द्वौ च दोषावुदाहृतौ॥ रसासृङ्मांसमेदोस्थिमज्जाशुक्राणि
धातवः॥ ४०॥ सप्तदूष्या मलामूत्रशकृत्स्वेदादयोपि च॥ सम्यक्पक्वस्य भुक्तस्य सारो निगदितो रसः॥ ४१॥ रंजितास्तेजसा
त्वापः शरीरस्थेन देहिनां॥ अव्यापन्नाः प्रसन्नेन रक्तमित्यभिधीयते॥ ४२॥ यद्रक्तं स्वाग्निसंपक्वं पवनेवायुघनीकृतम॥ ४
तन्मांसं स्वाग्निनिर्पक्वं तन्मेदः उनिमेद्धितम्॥ ४३॥ मेदोयत्स्वाग्निसंपक्वं वायुनात्यातिशोषितम्॥ तदस्थिसंज्ञां लभते सा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥

रत्वात्सर्वे विग्रहे ॥४५॥ पंचधातनम्बपा स्नाय्वं नकुरांवसेयाकृयं ॥ नत्लकं कचकं चेतितेषांस्थानानाथवुवे ॥४६॥ नितंबनालुशंखौ
सारीरोजान्वस्थि अंगुजं ॥ कपालं नकुरां घ्राणकर्णग्रीवाह्निकोअजम ॥४६॥ वलयं हृदपतपार्श्वे त्वन्यं नस्लकमद्विजम ॥ अस्थि
यत्स्वाल्लिनापक्वं नस्यसारोद्यनोद्भवः ॥४७॥ यः स्वेदस्तु अथकमूतः समस्तोत्पनिधीयते ॥ मज्जायंस्वाग्निसंपक्वः शुक्रं वीजं च तन्म
नस ॥४८॥ कफः पीतं मलः स्वेषु प्रस्वेदो नखरोम च ॥ स्नेहोक्षि विट्त्वचामोजो धातूनां क्रमसो मलाः ॥४९॥ ओजः सर्वे तेजो धातू
नां शुक्रं तानां परं स्मृतम ॥ धातूनां तेजसि रसे तथा जीवितशोणिते ॥५०॥ श्लेष्मणि प्राणतेत्वैद्येरोजः शब्दः प्रकीर्तितः ॥ चेष्टि
मपादवकं रवलं तत्त्वाभिधीयते ॥५१॥ स्तन्यं रजो वसा स्वेदो दन्ताः केशास्तथैव च ॥ ओजश्च सप्त धातूनां क्रमात्स्यप्रोपधातवः ॥५
लसीकास्याद्दुस्समत्वोज्जलपायस्वगाश्रयः ॥ शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्तिता ॥५३॥ मेदस्सत्यमानस्य स्नेहो वा
कथिता ॥ यान्हीरस्यपश्चमानस्य यथास्ते नानिका भवेत ॥५४॥ पञ्चमानस्य शुक्रस्य रजस्सस्वतथा त्वचः ॥ ज्ञेयावभासिनी
पूर्वासिध्मस्थानं च सा मता ॥५५॥ द्वितीया लोहिता ज्ञेया तिलकालकजन्मभूः ॥ श्वेता तृतीया संख्याता स्थानं चर्मदलस्य
स्पसा ॥ ताम्रा चतुर्थी विज्ञेया किलासश्वित्रभूमिका ॥ पंचमी वेदिनी ख्याता सर्वकुष्ठोद्भवस्ततः ॥५७॥ विख्याता रो
हिणी षष्ठी ग्रंथिगंडापची स्थितिः ॥ स्थूलात्वक्सप्तमी ख्याता विद्रध्यादेः स्थितिश्च सा ॥५८॥ आमन्यां मेदह्त्वचः के विन्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा च श्लेष्मधरा ख्याता ॥ द्वितीया रक्तधरा सिधमा श्वेतधारा तृतीयका ॥ ५८ ॥ चतुर्थी सर्वकुष्ठानामधिष्ठानत्वमागता ॥ विद्रध्यस्तु
[illegible] पंच च मीरोगकारिणी ॥ ५९ ॥ ... स्नायोनाम ... धंतमो विशन् ॥ यामधिष्ठाय जायन्ते स्थूलमूलानि पर्वसु ॥
दृ[illegible] षिवत्सारका निद्रुमविकिस्यमानि च ॥ धात्वाशयान्तरक्लेदो विपक्वः स्वं स्वमूष्मणा ॥ ६२ ॥ श्लेष्मस्नाय्वपरा
[illegible] स्नायवः काष्ठसारवत् ॥ आद्या मांसधरा यस्यां धमन्यः स्नायवः सिराः ॥ ६३ ॥ स्रोतांसि च प्ररोहन्ति पुनानैर्यथा पिभिः
[illegible] द्वितीया रक्तधरा मांसान्तः शोणितं स्थितः ॥ ६४ ॥ विशेषतः सिरासु च यकृत्प्लीह्नोः ... ॥ मांसात्तु वर्द्धते न्ही
... सीरहन्ता स्विन्नत्वात् ॥ ६५ ॥ मेदोधरा तृतीया च मेदो हि सर्वमुष्णस्थितं ॥ मवत्यणुषु ... तुमथ ... स्थिषु वथ मज्जैति ॥ ६
६६ ॥ ... कपालांतश्चतुर्थी तु कफाख्यया ॥ ... तस्थः कफो द्रवयति संधानस्थी शरीर जानं ॥ ६
पंचमी ... विञधारा साम पक्वाशयाख्यया ॥ ... विभजते ... पित्तधरा पुनः ॥ ... षष्ठी पक्वाशयान्तस्था ... ष्ठि
... मानतः ॥ ... पक्वाशयोन्मुखं ... ॥ ६९ ॥ शोषयन्ती वचेत् ... विमुंचति ॥ ... दुष्ठाथ
... ॥ ७० ॥ यमेके ... ग्रहणीसंज्ञा ... संवरी ॥ शरीरं धारयत्यग्निर्वत्तावृत्ते ... हिता ॥ ७१
... ॥ ७२ ॥ ... अन्नाद्... आधारान्... पाणिना ॥ ... गुरुमेरहिनो ... ॥

...ड़ियानि नवंति स्रपाधारान् रक्तस्याद्यः क्रमात्परे ॥१२॥ कफामपक्वपित्तानां वायोर्मूत्रस्य च स्मृताः ॥ गर्भाशयोऽष्ट
मः स्त्रीणां पित्तपक्वाशयांतरे ॥१३॥ कोष्ठांगानि स्थितान्येषु हृदयं क्लोम फुप्फुसः ॥ यकृत्प्लीहांत्रवृक्कौ च नाभिडिंबांत्रबस्त
यः ॥१४॥ कफस्य रक्तपुप्फुसात्स्यात् हृदयं स्थानमोजसः ॥ अधस्ताद्दक्षिणागोहृदयात् क्लोम तिलप्रवृत्ति ॥१५॥ जलवाहिशि
रामूलं तृष्णाच्छादनकृन्मतं ॥ हृदयाद्वामतोधश्च पुप्फुसो रक्तफेनजः ॥१६॥ पुरानवायोराधारो मुनिभिः परिकीर्तितः ॥ अ
धोदक्षिणतश्चापि हृदयाद्यकृतः स्थितिः ॥१७॥ तत्तु रंजकपित्तस्य स्थानं रक्तस्य संश्रयः ॥ शोणिताज्जायते प्लीहा वामतो
हृदयाश्रयः ॥१८॥ रक्तवाहिशिरामूलं सा तु दुष्टं रक्तो विहृतः ॥ भिन्नेऽसृजः पञ्चमानास्यात्तो वृद्धोप्रसारस्तो ॥२०॥ नाभिः सर्व
शिराणां स्यादाधारः शाकतः नः ॥ डिंबस्यादुन्नतो मांसस्य पुसा दाः स्त्रस्रं लवः ॥२१॥ सार्द्धत्रिव्याममात्राणि पुरुषाणांतु ता
नि स्त्रीणां त्रिव्याममात्राणि वस्तिर्मूत्रस्य चाश्रयः ॥२२॥ नेत्रश्रवणनासानां द्वे द्वे रंध्रे प्रकीर्तिते ॥ मुखमेहनपायूनामेके
कं रंध्रमुच्यते ॥२३॥ दशमं मस्तके प्रोक्तं रंध्राणीति नृणां विदुः ॥ स्त्रीणामान्यानि चत्वारि स्तनयोर्द्वे रक्तवर्त्मनः ॥२४॥ मन
प्राणाल्पाणी दोषधातूपधातवः ॥ धातूनां च मलास्त्वेम स्वामित्याहुर्यतो ॥२५॥ संधयस्तिर्यग्भिर्नेत्रानि स्नातो
सिसंज्ञाः ॥ बहूनि तानि संख्यायस्मर्यंते नैवमाणितुः ॥२६॥ संधिबंधनकारिण्यो दोषधातुवहाः शिराः ॥ संख्यासप्तश

श्री ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नंतां सांधमन्योरसवाहिका॥ ६७॥ चतुर्विंशतिविख्याताः स्नाय्वानां नवशतीमता॥ तानि प्रोक्तानि देहेऽस्मिन्बंधने मांसमेद-
सां॥ ६८॥ महत्यः स्नायवः प्रोक्ताः कंडराख्यास्तु षोडश॥ प्रसारणाकुंचनयोर्दृष्टं तासां प्रयोजनं॥ ६९॥ संधयश्चास्थिसं-
धानादेहे प्रोक्ताः शतान्विताः॥ मांसपेश्यो वसायस्तु नवषष्ठं मायदेहिनां॥ ७०॥ शीर्षस्नाय्वास्थिपर्वाणि संधयश्च शरी-
रिणां॥ पेशीभिः संवृतान्यत्र बलवंति भवंति हि॥ ७१॥ कूर्चाः षट् तु हस्तयोर्द्वौ तथा द्वौ पादयोरपि॥ ग्रीवायामेकएक-
स्तिमेके सर्वपि ब्रह्मस्मृताः॥ ७२॥ कूर्चाश्च षट् शिरास्नायुमांसास्थिप्रभवाः स्मृताः॥ पृष्ठवंशस्योभयत्र महत्यो मांसरज्ज-
वः॥ ७३॥ चतस्रो मांसपेशीनां बंधनं तत्प्रयोजनं॥ सेवन्यः सप्त तासां तु पंचैव मस्तके॥ ७४॥ एका मेढ्रे सिजिह्वा-
यामेका विज्ञेयन्तनाः होचित॥ एकैकस्त्वस्थिसंधाततो गुल्फे जानुनि वंक्षणे॥ ७५॥ मणिबंधे कूर्परेपि कक्षायां च
शिरस्त्रिके॥ संघातास्तोदिताः सर्वे दश चतुर्दश॥ ७६॥ चतुर्दशैव सीमंताः केषां विद्धि गुणान्नव॥ संघातानां सी-
वितायैस्ताः सीमांतास्तु प्रकीर्तिताः॥ ७७॥ जालानि चैव जालानि शरीरे षोडशादिशेत्॥ शिरास्नाय्वस्थिपेशी-
नां स्वजालारि मणिबंधने॥ ७८॥ एकैकं च गुल्फे च जालान्येवं तु षोडश॥ विषमं स्पंदनं यत्र पीडिते रुक् च मर्म तत्॥
७९॥ मांसास्थिस्नायुधमनीशिरासंधिसमागमः॥ मर्म मर्मेति चैतेना तेषु तत्र जीवितं स्थितम्॥ ८०॥ मध्यपा

7

स्त तस्मात्कुर्यान् मध्यमांगुलिं ॥ तलहृन्नाम तु ज्ञेयात्तत्र विद्धस्य पंचता ॥१०१॥ अंगुष्ठांगुलिमध्यस्थं क्षिप्रमाक्षेपकारकं ॥
तस्योर्ध्वे द्व्यंगुले कूर्चः पादस्य भ्रमणकंपकृत ॥१०२॥ गुल्फसंधेरधः कूर्चशिरः शोफरुजाकरं ॥ जंघाचरणयोः संधौ गुल्फो रुक्-
स्तंभखांज्यकृत ॥१०३॥ जंघांतरे तिंद्रवस्तिर्मारयत्यसृजः स्रवात ॥ जंघोर्वोः संगमे जानु खंजता तत्र जीवतः ॥१०४॥ जानुन
स्त्र्यंगुलादूर्ध्वमाणि रुक्स्तंभशोफकृत ॥ ऊर्वी ऊरुमध्ये तद्व्यात्सक्थिशोषोऽस्रसंस्रवात ॥१०५॥ ऊरुमूले लोहिताक्षं हंति पक्ष-
मसृक्स्रवात ॥ मुष्कवंक्षणयोर्मध्ये विटपं षंढताकरम ॥१०६॥ इति सक्थ्नोस्तथा बाह्वोर्मर्माणिबंधोऽत्र गुल्फवत ॥ कूर्परं जानुव-
त्कौर्परं तयोर्विटपवत्पुनः ॥१०७॥ कक्षावक्षसमध्ये कक्षाधरः कुणित्वं तत्र जायते ॥ स्थूलांत्रबद्धः सद्योघ्नो विड्वातवमनो गुदः ॥
१०८॥ मूत्राशयो धनुर्वक्रो वस्तिरल्पास्रमांसगः ॥ एकाशयोऽस्र नाम मध्ये कट्याः सद्यो निहंत्यमून ॥१०९॥ हेतामपक्वस्थानानां म-
ध्ये सर्वशि[illegible]य यः ॥ नाभिः सोपि हि सद्योघ्नो हृदामामाशयस्य च ॥११०॥ स्तनादि धाम हृत्स्थं स्त नोरः कोष्ठमध्यगं ॥ स्तनरोहितम-
ला रक्षोर्ध्वं द्व्यंगुले स्तनयोर्वदेत ॥१११॥ दुष्ट्वाधो रक्तकफपूर्णकोष्ठो नश्यत्यतयोः क्रमात ॥ अपस्तंभावुरःपार्श्वे नाड्यौ वातवाहि-
नी ॥११२॥ रक्तेनास्य पूर्णकोष्ठो च श्वासात्कासाच्च नश्यति ॥ पृष्ठवंशारसोर्मध्ये तयोरेव च पार्श्वयो ॥११३॥ अधोंसकूटयोर्विद्या-
द्याकायस्थमर्माणि ॥ तयोः कोष्ठे असृजः पूर्णे नश्येद्भूते न पूयतां ॥११४॥ पार्श्वयो पृष्ठवंशस्य श्रोणिकर्णौ पुनः स्थितौ ॥ वंशा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रितो स्फिक्स्रोतोरूर्ध्वं कटीकतरुणौ स्मृते ॥११५॥ तत्रासृक्क्षयात् पाण्डुर्हीनरूपो विनश्यति ॥ पृष्ठवंशं ह्युन्नमयतो पौसंधी ककुदि पार्श्वयोः ॥११६॥ जघ
नस्य बहिर्भागे मर्मणी ते कुकुंदरे ॥ चेष्टाहानिरधःकाये स्पर्शाज्ञानं च तद्व्यधात् ॥११७॥ पार्श्वान्तरनिबद्धौ यावुपरि श्रोणिकर्णयोः ॥ आमाश
याच्छादनौ नितंबौ तौ तरुणास्थिगौ ॥११८॥ अधःशरीरे शोफोऽत्र दौर्बल्यं मरणं ततः ॥ पार्श्वान्तरनिबद्धौ मध्ये जघनपार्श्वयोः ॥११९॥ तिर्यगू
र्ध्वं च निर्दिष्टौ पार्श्वसंधी तयोर्व्यधात् ॥ रक्तपूरितकोष्ठस्य शरीरान्तरसंभवः ॥१२०॥ स्तनमूलाज्जेवेभागे पृष्ठवंशाश्रये सिरे ॥ बृहत्यौ तत्र विद्ध
स्य मरणं रक्तसंस्रवात् ॥१२१॥ बाहुमूलाभिसंबद्धे पृष्ठवंशस्य पार्श्वयोः ॥ अंसयोः फलके वा तु स्वापशोषौ तयोर्व्यधे ॥१२२॥ ग्रीवामुभ
यतः स्नाव्नी ग्रीवा बाहु शिरोन्तरे ॥ स्कंधांसपीठसंबंधावंसौ बाहुक्रियाहरौ ॥१२३॥ कंठनाडीमुभयतः सिरा हनुसमाश्रिता ॥ चतस्रस्तासु
नीले द्वे मन्ये द्वे मर्मणी स्मृते ॥१२४॥ स्वरप्रणाशवैकृत्यरसाज्ञानानि तद्व्यधे ॥ कंठनाडीमुभयतो जिह्वामुभयतः सिराः ॥१२५॥ पृथक् च
तस्रस्तासद्योह्वंत्यसून्मातृकाख्याः ॥ कृकाटिके शिरोग्रीवासंधौ तत्र चलं शिरः ॥१२६॥ अधस्तात् कर्णयोर्निम्ने विधुरे श्रुतिहारिणी
॥ फणावनुमयतो घ्राणमार्गं श्रोत्रपथानुगौ ॥१२७॥ अंतर्गलस्थितौ वेधाद्गंधविज्ञानहारिणौ ॥ नेत्रयोर्बाह्यतोऽपांगौ ॥ भ्रुवोः पुच्छा
न्तयोरधः ॥१२८॥ तथोपरि च वा निम्नावावर्तौ विध्यमेयुतु ॥ अनुकर्णौ ललाटान्ते शंखौ सद्यो विनाशिनौ ॥१२९॥ केशान्ते शंखयोरू
र्ध्वमुत्क्षेपौ स्थापनी पुनः ॥ भ्रुवोर्मध्ये त्रयः पञ्चरात्रं शल्यो जीवेत्समुद्धृते ॥१३०॥ स्वयं वा पतिते कायात्सद्यो नश्यति तूद्धृते ॥ जिह्वान्दिनासि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काष्ठो त्ररवचतुष्टयसंज्ञमे ॥१३॥ तास्तुन्यास्यानि च वारिस्रोतसां तेषु मर्मसु ॥ विद्धः संगाढकाख्येषु सद्यस्त्यजति जीवितं ॥१४॥ कृपाटसं
ययः पंचस्विमं तास्तिर्यगूर्ध्वंजो ॥ नमोन्मादमनोनाशौ स्तस्तु विद्धेषु नश्यति ॥१५॥ थां नरोमस्तकस्यार्ध्वं शिरासंधिसमागमः ॥ रो
मावर्त्तोधिपो नाम मर्मसद्योनिकृन्तनः ॥१६॥ इति शोषधात्वादिमर्मसंज्ञाप्रकरणं ॥२॥ अथ रोगाणां हेत्वादिप्रकरणम् ॥ का
लार्थकर्मयोगो हेतुर्हीनातिमिथ्यारूपः ॥ रोगाणाम् अथ सम्यग्योगस्त्वारोग्यकारणं भवति ॥ तत्र कालस्तु शीतोष्णवर्षाभेदात्त्रिधा
मताः ॥ सहीनो हीनशीतादिरतियोगोतिलक्षणः ॥३॥ मिथ्यायोगस्तु निर्दिष्टो विपरीतस्वलक्षणः ॥ हीनोऽर्थेनेंद्रियस्यास्याः संयोगः
स्वेनैव वा ॥४॥ अतियोगोतिहृत्तिः स्यात्सूक्ष्मभासुरभैरवं ॥ अत्यासन्नातिदूरस्थं विप्रियं विकृतादि च ॥५॥ यदक्ष्णा वीक्ष्यते नू
पं मिथ्यायोगः स दारुणः ॥ एवमत्युच्चपूत्यादीनिंद्रियार्थान्यथातथं ॥६॥ कायवाक्चित्तभेदेन कर्मापि विभजेत्त्रिधा ॥ कायादि
कर्मणो हीना प्रवृत्तिर्हीनसंज्ञकः ॥७॥ अतियोगोतिहृत्तिस्तु वेगोदीरणधारणं ॥ विषमांगक्रियारंभः पतनस्खलनादिकं ॥
॥८॥ भाषणं सामिभुक्तस्य रागद्वेषभयादि च ॥ कर्म प्राणातिपातादि दशधा यच्च निंदितं ॥९॥ मिथ्यायोगः समस्तोसावित्वा
मुत्र वा हितं ॥ रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता ॥१०॥ स तु गर्भजातपीडाप्रभावकालस्वभावजा रोगाः ॥ इति ते सप्तविधाः स्यु
र्भावेति पुनरेकशो द्विविधा ॥१०॥ तथा हि सहजास्तत्र पितृजा मातृजाश्चापि ॥ गर्भजास्तु रजसोस्तथा दोहदजाः परे ॥११॥ जात

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जाता अपि द्विधा तर्पणात्तर्पणोद्भवाः ॥ पीडाकृतास्तु द्विविधाः शारीरा मानसास्तथा ॥१२॥ एवमागन्तुजा अपि द्वेधा पिशाचाद्याज्ज्वराद
दयः ॥ कालजा तान्व्यापन्नजा अपि संरक्षणजा अपि ॥१३॥ स्वभावजा अपि द्विधा कालाकालनिमित्तजाः ॥ दृष्टापचारजाः केचित्केचि
त्पूर्वा[illegible]राधजाः ॥१४॥ तत्संकरोद्भवं त्वन्ये त्रिविधं वै ते पुनः स्मृताः ॥ द्विधा स्वपरतन्त्रत्वाद्व्याधयोऽन्त्याः पुनर्द्विधा ॥१५॥ पूर्वजाः पूर्व
रूपाख्या जाताः पश्चादुपद्रवाः ॥ सुखसाध्यस्तु कृच्छ्रसाध्यजा याप्यासाध्या विनिश्चिताः ॥१६॥ चतुर्धा ते पुनर्द्वेधा निजागन्तुविभेदतः ॥ वातपि
त्तकफद्वंद्वसान्निपातप्रकोपतः ॥१७॥ पुनस्ते सप्तधा बोध्या नामभेदात्त्वनेकधा ॥ येयावद्देव भिषजा भगन्दरप्रयोगास्तावद्व्रणानि मुप ६
जांत्पगदैर्विनाय्य ॥ प्रादुर्भवंति च पुनः सहस्राद्विदोषास्ताद्वविधास्तु रिति प्राप्यत मां गदास्ते ॥१८॥ नियतं मरणं ख्यापकलिङ्गमरिष्टं
च रिष्टं च ॥१९॥ निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा ॥ संप्राप्तिश्चेति विज्ञानं रोगाणां पंचधा स्मृतम् ॥२०॥ चेष्टानुपशयोऽपि स्या
त्तेषां सन्द्रागमनुच्यते ॥ व्याध्युत्पत्तिकरं त्रोक्तं निदानं बहुधा नु तत् ॥२१॥ चत्वारो व्यभिचारी दूरनिकटे प्रधानि कत्वात्पुनस्ते साम्येन द्वि
यकार्ययुक्तपरिणामिति प्रज्ञापराधात्त्रिधा ॥ रूक्षदोषामयकारणात्पित्तथा द्वौ वा अकोत्या स्कोवाह्यान्यन्तरने स्वतोपि कार्थिनाकेतोः प्रत्ने
हास्त्वभी ॥२२॥ व्यभिचारी यथा व्याधिजननेऽशक्तिमान्त्वयः ॥ अबलत्वाद्विप्रकृष्टो यथा स्मेतसंचितः ॥२३॥ कफः कफव्याधिकोऽव
संते निकटो यथा ॥ नक्तं दिनर्तुभुक्तांशो लसवा दोषप्रकोपना ॥२४॥ नापन्हते यथा रीस्ते थ प्रधानं विषादिकम् ॥ अथाता न्यप हृषीक

KKSU LIBRARY
RAMTEK
441 106
M-1878
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थसंयोगस्तु यथायथं ॥ २५ ॥ हीनातिमिथ्यायोगेनयुक्तान्परस्परयः ॥ परिणामस्त्वयोगादिप्रयुक्तः कालनिश्चये ॥ २६ ॥ शीताद्याहरविंद्र
स्तावुं तेंतर्नाथमन्नहि ॥ योगाहेतोरधर्मस्य परिणामं गतस्य हि ॥ २७ ॥ कालांतरेतस्य दुःखकर्तृत्वमथनस्य तु ॥ चक्रः प्रज्ञापराधेत भावमा
श्यतो भवेत् ॥ २८ ॥ मिथ्याज्ञानस्तेनुस्रवधादिर्कितजन्मनः ॥ प्रज्ञापराधोऽधर्मस्य मूलंनचवचावसं ॥ २९ ॥ निरूपितेत्राधर्मस्य का
रणत्वेन यन्स्मराः ॥ सिद्धत्वात्प्रज्ञापराधो मिथ्याधीप्रवृत्तिः सच ॥ ३० ॥ कायवाक्चित्तभेदेन योगस्त्रीविधकर्मणः ॥ व्याधेर्हेतुर्यथा
मत्त्वा मन्दरागोपांडुयन्स्मरणः ॥ ३१ ॥ मन्तु यद्यपि दोषाणां कोपिन्यपितद्भवैः ॥ तथाप्यारभ्यते दोषैः पारम्पर्य न्येनेतरः ॥ ३२ ॥ दु
ष्टं रोगस्य हेतुर्व्यम्दोषथ दोषहेतवः ॥ मधुराद्यास्तथादीनां निमित्तानि रितुद्भवाः ॥ ३३ ॥ व्याधिदोषाभयोर्हेतुस्तद्विधा निरूप्यते ॥ यथा
रुक्षलघुगमनैर्वातरनोस्यद्यपि ॥ ३४ ॥ दोषप्रकोपपूर्वं हि जननंयन्स्मरणो भवेत् ॥ तथा विदोषवद्व्याधावपि तस्य निदानता ॥ ३५ ॥
योन्कासावोधयत्येवं तत्रैकेवलरोगहेतु ॥ दोषहद्दानप्रयोज्यं किंतु तेद्वयनाशकृत् ॥ ३६ ॥ स्वकारणान्नतस्य दोषस्य विनिवर्त्तनात् ॥
कार्यभूतस्य रोगस्य विनिवर्त्तिर्भवेदिति ॥ ३७ ॥ द्वयोर्विविधा शान्तिर्हि दृश्यते कथमन्यथा ॥ श्लेष्मिके तिमिरे श्लेष्महरं नवमनं म
तम् ॥ ३८ ॥ व्यंजकस्तु यथा सूर्यतापो निद्रान्तिकारकः ॥ यथा भवति हेमंते संचितश्लेष्मणो मधौ ॥ ३९ ॥ उत्पादकोयया तत्र हेमंते म
धुरो रसः ॥ तथस्य श्लेष्मणोहेतुर्वाह्याभ्यन्तरतो द्विधा ॥ ४० ॥ आहाराचारकालाद्या वाह्यास्ते हेतवो यथा ॥ वृन्दैः कषायकटुतिक्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रसैर्व्यवायव्यायामजागरणाद्वेगविधारणाद्यैः नैवानवैषौंक्य विषमासनवर्षकालैर्वायुः प्रकुप्यति निशाहिवसांतयोश्च ॥४१॥ कटुम्लत्वार
तीक्ष्णातपदधिमदिरातैलकोपोपवासस्त्रीसुक्तोमाशनाद्याहिनिरपि शरद्यहरार्धे रिनार्द्धे ॥ पीतश्लेष्मातु शीतलाम्लवणमधुर
स्नीरनव्यान्नतोयाहरस्वापैः पिष्टजाताद्यः शरत्कुरुगुडैर्माघवैरर्निशादौ ॥४२॥ अन्यंतरोरोगदुष्यास्तु पूर्वं निरूपिताः ॥४३॥ मावि
व्याधिज्ञापकमेवयदिस्यत्किंमुद्भवेतत्स्यात् ॥ आदिमन्रूपंहेत्वासामान्यविशिष्टभेदान्तत ॥४४॥ उत्पित्सुरामयोरोगविशेषेणानविशि
तः ॥ संन्स्यतेयेनस्सामान्यंतच्चमारीयवदीरितम् ॥४५॥ तद्विशेषाधिष्ठितस्त्तविशिष्टंज्जनवन्मतं ॥ तज्जन्यंवर्त्तमानस्यव्याधेर्यद्धोधकंम
वत ॥४६॥ रूपंतदुच्यतेद्वेधापूर्वंरूपवदीरितं ॥ ज्वरस्यनावगमकमाद्यंसंतापवन्मतं ॥४७॥ किमात्मकत्वगमकंवेगवैषम्यवत्परम् ॥ हितो
षधान्नविहारैर्यो विपरीतगुणास्तथा ॥४८॥ मेषजान्नविहारासंचारदेशकालाः समाश्रपि ॥ येचव्याधिहरास्तेषांमुपयोगःसुखावहः ॥४९॥
विद्यादुपशयंब्रूमः क्रमेणैषामुदाहृतिः ॥ शुंठीशीतककफज्वरेऽथममकंज्वरेरसान्क्रोडदमौदोषौ नि उष्मजः प्रसुप्तिकफजेरोगोद्वेषौ नियुक्तो
दरें ॥ शीतश्लेष्मसमुद्भवेहितनरः कास्वश्वगतेतरः कुष्ठे स्यात्खदिरस्ततोभेषजः मतीसारेमसूरान्नियं ॥५०॥ स्याद्रक्तंकुष्ठदेवनाद्धरि
द्राकाचीदिस्त्रवर्जामयेचेष्टास्पात्मारुतः प्रदेशात् हितस्त्तद्धातुसंस्थान कते ॥ कालोद्विप्रतिकूलमौषधमिदंतत्कारि पित्तज्वरेप्रयान्नम
वतीरस्नानविहिताचेष्टारवेः कीर्तनं ॥५१॥ जेहमारुतवर्ज्जितेचाशीशीं रेश्माथकालोहिमाद्रमंतोविषमतिपित्तजनितेतद्धादिहेतौसमे ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेषज्यंस्नसुनाद्यथान्नमुद्दितं न कैयरसपामयोचेष्टान्मास्याद्रैसमीरणानचैत्रासोऽन्दहेध्वांतसुकृ॥५३॥ दशाः पोक्तनिशाररैककफस्तेनका
लस्कोहेमंतकोमेषज्यंमरुनवमोचमिकारस्तुल्येपिरोगोपशाति॥ अन्नंस्यात्स्निसारसंज्ञकेगरेदुग्धं वमोत्थं हेनवमर्थं वसंतो विहारऽदिनो
दूशोजुगुप्सान्वितः॥५३॥ उन्नोसत्वकरोहधुषः समुद्दितः कालो हितश्च हृद्दिकेसाम्यरोगनिदानयोरपिस्तोगुर्वादिस्लेपः शुभः॥ वन्हिषु
भूमिषजितं हिमरस्कान्नमद्यं तुमद्यान्यपयस्तं मरुत्थमज्ञातवातहररोगेचशानुतोयेतरः॥५४॥ दाहोष्णेजननेतुसोष्णमनुष्टंदेशोमरुच्छ
र्दितं स्त्रैरणग्रीष्मजरन्नागुरुस्मृदितः कालोपरोगग्रीष्मकः॥ इत्येतानि नवंतियद्यपिमिथोभिन्नानि सर्वाण्यपि प्राहुर्हेतुविपर्ययार्थ
कराणि हिमोनभिन्नानिहि॥५५॥ विपरीतोनुपशयो व्याध्यसात्म्यमितिस्मृतः॥५६॥ यद्वा व्याधेः शमोपायः पूर्वैः पोक्तरः परः॥ एतौ
रोगेगूढलिंगे विज्ञानत्वं समाप्नुतः॥५७॥ वर्षाशरद्वसंतेषु कुप्यंति पवनादयः॥ दिनत्रियामानुक्तांतमध्यादिसमयेषु च॥५८॥ यथा
स्वकालपंगतं दोषगत्युपसन्निहितम्॥ व्याधिजन्मनुसंप्राप्तिस्तदुपाधिभिदाः स्मृताः॥५९॥ संख्याविकल्पप्राधान्याऽप्राधान्यानि
बलाबले॥ रोगाणांगणनासंख्या सा यथाष्टौ ज्वरा इति॥६०॥ दोषाणां समवेतानां विकल्पोऽशांशकल्पना॥ स्वतंत्रतानुप्राधान्यं पर
तंत्रमप्रधानता॥६१॥ हेत्वादिकात्स्न्यविवयवैर्बलावलविशेषणं॥ स्वतंत्रमुक्ता रात्रिनिशादिकालेन तूपन्नूपयोः॥६२॥ यत्तु उक्तास्पाः संप्रा
प्तिर्व्याधिविज्ञानतामता॥ विकल्पादिसमन्नूपाया चिकित्सोपयिकी हि सा॥६३॥ इतिनिदानादिसंज्ञाप्रकरणम्॥१॥ अथ ज्वरादि प्रकरणं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धन्वंतरिमते द्रव्यं रसादीनां समाश्रयः॥ शमनं कोपनं स्वस्थहितं द्रव्यमिति त्रिधा॥१॥ समानैरसमानैर्वा युक्तं द्रव्यं रसादिभिः॥ समं
नयति वातादीन् शमनं तत्प्रकोपनं॥२॥ यद्युक्तं विपरीतैर्वा समैर्वापि रसादिभिः॥ प्रकोपयति वातादीन् यं स्वस्थहितं हितं॥ द्रव्यस्य
हृद्योऽठतुरपि स्वस्थस्य न तथापि यत्॥ शमनादीन्प्रभावस्य भेदान्के विदुर्बुधाः॥४॥ रसनार्थो रसस्तत्र सम्यग्व्यक्तो रसः स्मृतः॥
अव्यक्तोऽनुरसः किंचिदंते व्यक्तोऽपि चेष्यते॥५॥ स्वादुरम्लोऽथ लवणः कटुस्तिक्तोऽथ एव च॥ कषाय इति षट्कोऽयं रसानां संग्रहः स्मृतः॥६॥
षट्पंचकाः षट्चत्वारः षट्त्रयो द्वौ रसाः स्युस्ते तु द्विकोपंचदश प्रकाराः॥ भेदास्त्रिके विंशतिरेकमेव द्रव्यं षडास्वादमिति त्रिषष्टिः॥७॥ गुरुमंदहि
मस्निग्धश्लक्ष्णसांद्रमृदुस्थिराः॥ गुणाः ससूक्ष्मविशदा विंशतिः सविपर्ययाः॥८॥ गुरुरिहेहंरणा शान्तिः लेखने कर्म्मणि लघुर्मंदः॥
शमने तीक्ष्णः शोधने शान्तिः स्यात्स्तंभने शीतः॥९॥ स्वेदने कर्म्मणि तूष्णः स्निग्धः स्नेहने शान्तिः॥ रूक्षः शोषणे शान्तिः श्लक्ष्णः
स्याद्रोपणे तद्वत्॥१०॥ खरश्चलो लेखने कर्म्मणि सांद्रः स्यात्प्रसादने तद्वत्॥ द्रवश्चलो विलोडने स्यात्मवति स्थिरः स्थैर्ये मृदुर्द्भवे॥११॥ कठिनः स्थि
रो विधारणे भवति च सः पूरणे सूक्ष्मः॥ विवरणकारी स्थूलः संवरणे स्याद्धने विशदः॥१२॥ लेपनकर्म्मणि पिच्छिल इति तद्वै विंशति
गुणा बोध्याः॥ एष्वेवांतर्भवंत्यन्ये गुणाः पंचगुणास्तथा॥१३॥ इन्द्रियार्थो व्यवायी च विकासी चापरे गुणाः॥ व्यवायी देहमखिलं व्याप्य पाका
यकल्पते॥१४॥ विकासी विकसन्धातून् संधिबंधान्विमोक्षयेत्॥ आशुकारी तथाशु व्याधावत्यंभसि तैलवत्॥१५॥ वीर्यं द्रव्यस्य तद्भूया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्योगाद्यस्य या क्रिया ॥ नावीर्यं कुरुते किंचित्सर्वा वीर्यकृता हि सा ॥ १६ ॥ वीर्यं पुनर्वदंत्येके गुरु स्निग्धं हिमं मृदु ॥ लघु रूक्षोष्णतीक्ष्णं च तदे
वं मतमष्टधा ॥ १७ ॥ उष्णं शीतं द्विधैवान्ये वीर्यमाचक्षते पि च ॥ नानात्मकमपि द्रव्यमग्नीषोमौ महाबलौ ॥ १८ ॥ व्यक्ताव्यक्तं यथा विश्वं ना
तिक्रामति जातुचित् ॥ जाठरेणाग्निना योगाद्यदुदेति रसांतरं ॥ १९ ॥ रसानां परिणामांते स विपाक इति स्मृतः ॥ स्वादुः पटुश्च मधुरमम्लो
म्लं पच्यते रसः ॥ २० ॥ कटुतिक्तकषायाणां विपाकः प्रायशः कटुः ॥ सर्वातिशायी द्रव्यात्मा प्रभावः परिकीर्तितः ॥ २१ ॥ रसादिसाम्ये यत्कर्म
विशिष्टं तत्प्रभावजं ॥ दंती रसाद्यैस्तुल्यापि चित्रकस्य विरेचनी ॥ २२ ॥ मधुकस्य च मृद्वीका घृतं क्षीरस्य दीपनम् ॥ कटुपाक रसास्नि
ग्धगुरुत्वैः कफवातजित् ॥ २३ ॥ लसुनो वातकफस्तेन्नतु नैरवयद्गुरोः ॥ मिथो विरुद्धान्वाताहीन स्तोकिताद्यायर्यंतियत् ॥ २४ ॥ कु
र्वंति यवकाद्याश्च तत्प्रभावविजृंभितं ॥ किंचिद्रसेन कुरुते कर्म पाकेन चापरम् ॥ २५ ॥ गुणांतरेण वीर्येण प्रभावेणैव किंचन ॥ यद्द्र
व्ये रसादीनां बलवत्वेन वर्तते ॥ २६ ॥ अभिभूयेतरांस्तत्तत्कारणत्वं प्रपद्यते ॥ रसं विपाकस्तौ वीर्यं प्रभावस्तानपोहति ॥ २७ ॥ बल
साम्ये रसादीनामिति नैसर्गिकं बलं ॥ इति द्रव्यरसगुणवीर्यविपाकप्रभावप्रकरणं ॥ ३ ॥ अथ संशोधनादिप्रकरणं ॥ विशोधनं लं
घनं स्यात्सल्यागोपतर्पणं ॥ शमनं शोधनं चेति द्विधा संशोधनमुच्यते ॥ १ ॥ न शोधयति यद्दोषान्समान्नोदीरयत्यपि ॥ समीकरोति वि
षमान्शमनं तच्च सप्तधा ॥ २ ॥ पाचनं दीपनं क्षुत्तृड्व्यायामातपमारुताः ॥ यद्दुष्टं विपचेत्सामं प्रभावाद्वह्निदीप्तिकृत ॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्दीपनं पाचनं तु वह्निकृन्नामपाचनम्॥ वह्निं कुर्यान्न चामं तत्स्याद्दीपनपाचनम्॥४॥ प्रमथ्या संज्ञा विज्ञेया योगो दीपनपाचने॥ यदीरयेद्बहि
र्दोषान्पंचधा शोधनं हि तत्॥५॥ निरूहो वमनं कायशिरोरेको ऽस्रविस्रुतिः॥ अपक्वं पित्तश्लेष्माणं बलादूर्ध्वं नयेत्तु यत्॥६॥ वमनं तद्धि वि
ज्ञेयं देहे संशोधनं हि तत्॥ स्थानाद्धीनं यदूर्ध्वमधो वा मलसंचयम्॥७॥ यच्चापक्वमपक्वं वा मलादि द्रवतां नयेत्॥ विरेचयेद्रेचनं
तत्स्यादनुलोमनं॥८॥ कृत्वा पाकं मलानां यद्भित्त्वा बंधमधो नयेत्॥ अविधायैव यत्पाकं प्रतिबंधं स्रवतोऽपि वा॥९॥ स्थितं नय
त्यधस्तात्तत्स्रंसनं परिकीर्तितम्॥ संहतस्य विभागं यद्विधायोन्मूलनं नरम्॥१०॥ भवत्यासुतरश्चाकुरस्थे स्तनं ह्यो दिवद्दुधा॥ विश्लेष
यति यद्दोषान्संहतांस्तत्कफादिकान्॥११॥ पश्चादुन्मूलयत्याशु विज्ञेयं छेदि भेदनं॥ आग्नेयगुणभूयिष्ठमपि संपरिशोषयेत्॥१२॥ ६
संग्रहस्तातिमस्तं ग्राहि तच्च स्तंभनमुच्यते॥ यत्करोत्यम्लमुद्गारं दाहं च हृदये तृषा॥१३॥ चिरात्प्रयाति पाकं च तद्विदाहि प्रलिंपति॥ मु
खे हृदन्ते निर्यास वाहि स्रोतोमुखानि यत्॥१४॥ पैच्छिल्यात्तद्विभिष्यंदि स्रोतांसि विहरत्यतियत्॥ वैशद्यात्कफहं तत्त्वात्स्नानिष्यंदि
लेखनम्॥१५॥ धातून्मलान्वा देहस्य विशोष्योल्लेखयेच्च यत्॥ निरस्य पिच्छिलं वीर्यात्स्रोतोभ्यो दोषसंचयम्॥१६॥ यद्द्रव्यं प्रमाथि स्या
द्यत्तु बुद्धिं विलुंपति॥ तमोगुणप्रधानत्वान्मदकारी तदुच्यते॥१७॥ यावदायुःसुखं जीवेत्प्राणी येन जरां विना॥ तावत्तदपि विज्ञेयं
वयसः स्थापनं परम्॥१८॥ यज्जराव्याधिविध्वंसि भेषजं तद्रसायनम्॥ वाजीवातिबलो येन तद्वाजीकरमुच्यते॥१९॥ प्रवर्तकं स्याच्छु

पि ४

17

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नकं स्याज्जनकप्रवर्त्तकम् ॥ शुक्रलं शुक्रजननं तृष्यं शुक्रविवर्द्धनम् ॥ १४ ॥ योगवाहि तु तत्स्याद्यत्संयोगिगुणावहकम् ॥ सुखसंज
नकं यत्तदाह्लादमाख्यातं तर्पणं मतं ॥ २१ ॥ तर्पणं त्वप्रीजननं तुमिन्द्रियतृप्तिरुच्यते ॥ हृदयस्य प्रियं हृद्यं जीवनं जीवनौषधम् ॥ २२ ॥ प्रीणनं
पुष्टिजननं बृंहणं धातुवर्द्धनं ॥ लेखनं स्यात्कफादीनां कर्षणं तनुविलेखनं ॥ २३ ॥ इति लंघनादिप्रकरणम् ॥ इति लंघनादिप्रकरणं ॥
अथ फलत्रिकादिप्रकरणम् ॥ शिवा विभीतकी धात्री मिलितैस्त्रिफला त्रिफलापि वा ॥ ककंगमालनी सगुणकमुक्तैस्त्रिफला द्वितीय ॥ १ ॥ स्वोचिता
१ ॥ द्राक्षाकाश्मर्यफलैः सापि फलोत्तमा ॥ भमयागुरुविश्वाद्रैस्त्रिसमं स्यात्समत्रिकम् ॥ २ ॥ अथ त्रिमधुरं ज्ञेयं मधुसर्पिर्गु
डशर्कराः ॥ ४ ॥ एलात्वंगपत्रैस्तु त्रिसुगंधं त्रिजातकम् ॥ ३ ॥ चातुर्यातं समनागाद्वैर्विशाजलदनागरैः ॥ त्रिवार्षिकैश्चतुर्भद्रं गुडूच्या सहि
तैस्मृतं ॥ ५ ॥ कपित्थबिल्वचांगेरीदाडिमैश्चतुरम्लकम् ॥ बिल्वकाश्मर्यतर्कारीपाटलाटिंटुकैर्महत् ॥ ५ ॥ ह्रस्वं बृहत्यंशुमती
द्वयगोक्षुरकैः स्मृतं ॥ ७ ॥ नाम्नां पंचमूलान्यां दशमूलमितिस्मृतम् ॥ ६ ॥ मुद्गपर्णी माषपर्णी वल्ली रंभ पुनर्नवैः ॥ मध्यमाख्यं पंचमू
लं वीरार्षभकजीवकैः ॥ ७ ॥ शाकश्रेष्ठानीमयुक्तैर्विज्ञेयं जीवनाह्वयम् ॥ शालीन्क्षुदर्भकाशेक्षुशरायवैः स्यात्तृणाह्वयम् ॥ ८ ॥ तानि
शाल्यामकशृंगीगोपवल्लीविदारिका ॥ वल्ल्याख्यं पंचमूलं स्यात्सुषाणी कंटकान्वितैः ॥ ९ ॥ सहिंस्रासैर्यकैः प्रोक्तं कंटकाख्यं पंचमू
लकम् ॥ क्षीरिणः पीपलप्लक्षवटोदुंबरवेतसाः ॥ १० ॥ पंचांगं च तरोः पुष्पफलत्वङ्मूलपत्रकैः ॥ दशांगं सारनिर्यासशाखाङ्गु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पयोन्वितैः ॥११॥ क्वचिद्धारलापयस्थाने हैन्तकं देवपुष्की ज्ञितौ ॥ आम्रजंम्बूकपित्थानां वीजपूरकविल्वयोः ॥१२॥ गंधकर्म्मणि सर्वत्र प
त्राणि पंचपल्लवाः ॥ पंचनिंवं पंचपत्रफलत्वङ्मूलपुष्पकैः ॥१३॥ पंचगव्ये गवां क्षीरदधिमूत्रशकृद्घृतैः ॥ पिप्पली पिप्पली
मूलचव्याचित्रकनागरैः ॥१४॥ पंचकोलं समाख्यातं मधुराद्युतम् ॥ षडंगमुस्तशीतांबु घनाद्यैस्तथ्यतिज्वरे ॥१५॥ षड्भिः
षडूषणाख्यं सौः पाठाद्यैः शुंठीरितः ॥ माक्षीकं तुल्यकान्तौ चनीलांजनशिलालकाः ॥१६॥ रसकश्चेति विज्ञेया एते सप्तोपधात
वः ॥ स्वर्णतारारताम्राणि नागवंगौ च तिन्ह्नाकं ॥१७॥ धातवः सप्त विज्ञेयाः क्वचिद्व्योहोपि चाष्टमः ॥ हेमेरहेवककाकोल्यौ जीव
कर्षभकौ तथा ॥१८॥ ऋद्धिर्वृद्धिश्च वैतैः सर्वैरष्टवर्ग उदाहृतः ॥ पांडुल्यां नवकं तुल्य लोहचूर्णं नवायसम् ॥१९॥ जीवंती काको
ल्यौ मेदेहेमुद्गमाषपर्णी च ॥ जीवकर्षभकमधुकं चेति गणो जीवनीयाख्यः ॥२०॥ इति फलत्रिकादिप्रकरणम् ॥५॥ अथ द्रव
द्रव्यप्रकरणम् ॥ दिवा दिवाकरकरैर्निशाकरकरैर्निशि ॥ धनप्रशीतमशेषरात्रमगस्त्योदयनिर्विषं ॥१॥ शुचिहंसोदकं नाम नि
र्म्मलं मलजित्समं ॥ नाभिष्यंदि नवा रूक्षं पानादीष्वमृतोपमम् ॥२॥ क्वाथ्यमानं च निःफेनं निर्वेगं निर्मलीभवेत् ॥ तद्गुणा
वुत्तिनकं दीपनं पाचनं लघु ॥३॥ त्रिपादशेषं वातघ्नं मार्गेपीतु न दृश्यते ॥४॥ पियूषानवदुग्धं सप्तरात्रान्मोरसोमाल्लिनो ॥ द
धिकूचीकारश्चापवोत्तोरणान तक्रकूचीकाः ॥५॥ पिंडस्तयोः किलाटः दधिमंडो मस्तुजातं दधिमंडं ॥ रध्युतं गोरधि सारध्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घ्रः कटु रो दधिस्नेहः ॥६॥ सस्नेहं दधिजं तक्रं मातुलुंग्येन तु कटुरम् ॥ सौवीराम्लमथान्यच्च काञ्जिकं चापरे जगुः ॥७॥ ससारा सारपाराद्धे
समो तु मथितं दधिः ॥ तक्रं पादाद्धोम्मथितं तक्रो ह्युदश्वित् सितोदकम् ॥८॥ सिता चतुर्जातमधुघृतार्द्रं दधि प्रयत्नेन सुरसं रसाला ॥ सु
जातं दधि सस्नेहं घोषदाडिमसंयुतम् ॥ सघृष्टसिताजाजिसमहत्कं परिकीर्तितं ॥९॥ सर्वं गव्योपस्वेदं दधिनिर्मथ्य गालितं
दाडिमीवीजसंयुक्तो चंद्रचूर्णावचूर्णितं ॥१०॥ सदहंके तु प्रमोदार्यं न खारि निरुदाहृतम् ॥ शीतामध्वादिमधुरा रागा तत्राद्य कां
नयः ॥११॥ तेसाम्लाः खाण्डवाः प्रोक्ता ह्याः पेयाः स्वांशुकगालिताः ॥ नागरखाण्डवमेकं वाष्टथ्यस्वाके चिदूचिरे ॥१२॥ मथितं तु गुडोपेतं सर
कारफलैर्नवैः ॥ तेन नागरसंयुक्तो विज्ञेयो रागखाण्डवः ॥१३॥ स्पष्टाम्लमधुरो स्पष्टकषायलवणो वराः ॥ अनित्ताः खाण्डवः कोल्हः
कपित्थे रूपहृष्टैर्मिनः ॥१४॥ साधितं सगुडं पक्वैः सहकारफलैर्मधुः ॥ तेन नागरसंयुक्तो विज्ञेयो घनखाण्डवः ॥१५॥ कपित्थतिंतिडी
काम्लवीजपूरकदाडिमैः ॥ पूतोष्णामिन्दुसारेणा योजितः स्वच्छखाण्डवः ॥१६॥ द्राक्षामधूककाश्मर्यखर्जूरैः सपरूषकैः ॥ पानकं
पंचसाराख्यं कर्पूरेणा सुवासितम् ॥१७॥ द्रव्येन्दोरसस्य समलच्छायसार्धोन्हिमल्लामलो ॥ विकाराः फाणितगुडमत्स्यण्डीखण्डश
र्कराः ॥१८॥ शालिषष्टिकपिष्टैर्यत्कृतं मद्यं हि सा सुराः ॥ पुनर्नवाशालिपिष्टैः कृता श्वेता च वारुणी ॥१९॥ सुरामण्डः प्रसन्नाः स्या
ततः कादंबरी घना ॥ तदधो जगलो ज्ञेयो मेदको जगलाद्घनः ॥२०॥ पक्वा सोमारजगरसः सुरावीजं च कुरावकः ॥ विनीतकत्वचायु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नैः आसितस्तुल्यपिष्टकैः ॥२१॥ शूलाम्लं त्वान्दिकी प्रोक्ता बुधैर्वैभीतकी स्मृता ॥ जवपिष्टसमुद्भूतैर्मद्यं यवसुरा मता ॥२२॥ शार्करं
माद्यानगौडाः सितामधुगुडैः सधातकीतोये ॥ माद्वीकं स्याद्दिकामद्यं धान्यासवस्तो मैरेयः ॥२३॥ आसवश्च सुरायाश्च द्वयोरेक
त्र भाजने ॥ संधानं तद्विजानीयान्मैरेयमुभयात्मकम् ॥२४॥ कोविदारधातकीपुष्पगुडधान्याम्लसंयुतः ॥ अरिष्टैः क्वथितैर्द्रव्यैरा
सवो क्वथितैस्तु तैः ॥२५॥ पक्वशीतरसो सीधुः पक्वमेन्तुरसो कमात ॥ शीतलतोयमदारवजै फलैः स्वायुरवं मतम ॥२६॥ स्यात्को
ह्लीमन्त्रस्त्रायवसन्तुसुत्राथवा ॥ द्रव्यं धान्यमल्वीजस्याः द्वान्यास्त्वतलसंस्थिती ॥२७॥ कंदमूलफलामद्यं लवणोस्त
मिश्रितं ॥ संधानोच्चिरकालाम्लं मासुतं परिकीर्तितम ॥२८॥ गुडमधु कांजिकमस्तादि स्नेहं धान्यगं चिरहिनी ॥ सुन्तो शुक्तं चान्यं ११
मधुसुक्तं पिप्पलीमधुमत ॥२९॥ जंबीररसो मांसैस धान्यस्य न्होद्वनारम्भस्थः ॥ धान्याम्लं तिसोमं धान्याम्लं कांजिकारनालेन
॥३०॥ जोयमेः सौवीरं यवैस्तु या रमथसोडाकी ॥ स्यात्कंदमूलादि जवदकैर्जलितु ग्रामत्रै ॥३१॥ सर्ववमद्यमसी जार्नमधुल
कमितिस्मृतम ॥ शीरवर्वं चिरसंस्थ स्पष्टवस्योपरि पीठिका ॥३२॥ इति द्रवद्रव्यप्रकरणम ॥६॥ अथ कृतान्नवर्गः ॥ आला व
जातीयद्वानन्नुवर्तयतेसमान ॥ तांस्त्ववैषम्यमापन्नान्समान्कुर्याद्धितं शितत ॥१॥ मोज्यमोदनसूपादि नन्स्यं मोदकमी
उकम ॥ चर्व्यं चिपिटधान्यादि रसालादि तु लेह्यकम ॥२॥ चूष्यमाम्रफलेत्वादि पेयं स्यात्पानकं पयः ॥३॥ मंडोसिक्थः

मन्डं भोज्यं च लेह्यं च चोष्यं पेयं चतुष्टयम २

21.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सासिक्थापियापरिस्रिक्थायवागूर्भवेत्॥ घनसिक्थातुविलेपी परिक्तुन्नस्त्वोदनो मतः॥४॥ कुल्माषस्य यवको लेस्वमुद्गैर्मसूरक
शुकैः॥ शुंगीधान्याकयुक्तैः स्वयूषः स्यात्सप्तमुष्टिकः॥५॥ धान्यत्रिकटुकोपेतमुद्गतंडुलसंयुतः॥ कृष्णपवहिंगुतैलाभ्यां समि
गोधूमगुणाः स्मृताः॥६॥ तिलतंडुलैरेवकृशरा यूषो मुद्गैः स्रोमांसैः॥ मूलैः फलैः पिष्टवस्तैः कांबलिको मांसमांसकटुक्लैः॥
॥७॥ मिश्रैः शुक्तमिश्रि विधान्यैर्वा दनो मिश्रकौदनः॥ तृतीदनो राधीनिशाशाशासुस्याजतिलान्वितः॥८॥ यवैस्तु यवको वाट्यः
परमान्नं तु पायसी॥ यूषाद्यास्त्वकृतकृताः कटुलवणास्नेहहीनयुताः॥ इंगयाटकवटिकाः स्वच्छाः स्वस्पद्रवाः स्मृतवशालते॥
शालिर्यवस्वाद्रूपाकधान्यगोधूमपिष्टिविकाः॥ पृष्टाः कमोद्गाजघनाः पृथुकोत्तुविकोलुकाः॥११॥ कुल्माषोर्द्धस्विन्नधा
नं चूर्णं गोधूमजं समितं॥ गुडमंथस्तु शालीनां वृत्तुनाज्यपक्वास्तु सन्नोव्रः॥१२॥ उत्कारिका पूपलिका पूपोपूपस्तु पिष्टजः॥ तिले
कीदृक्स्तु पिण्याकः पटलस्नीति तपिष्टकम्॥१३॥ श्रामं गोधूमजं चूर्णं सर्पिः क्षीरसमन्वितं॥ नातिद्रवं नातिसांद्रं विप्रंदेना
मनामतः॥१४॥ रन्धिधिपिंडसमेकत्वात्वर्द्धमागावशेषितं॥ श्वशपेंडेनोशालीनां तंडुलास्तिलसंयुता॥१५॥ पियालपन
सारीनां बीजमुष्टिसमावपेत्॥ क्षीरतुल्यं घृतं चात्र शर्करां तु महागुणां॥१६॥ सिद्धं त्रिकटुकोपेतं कर्पूरराधिवासितम्॥
एष विप्रंदेनो नाम स्वर्गलोके पितृप्रियः॥१७॥ यस्मात्पवेतापि तिष्ठितं स्पंदते सर्वतोऽन्नशासः॥ तस्मात्सुरविधानज्ञैर्विप्रं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रुतिभिः स्मृतं ॥१७॥ नातिस्निग्धं दोषघ्नमुष्णमस्ताति तं तु खाद्य हिते जद्वदः ॥१८॥ धन्वमहतं तु च सत्वं पायसं चापरे जगुः ॥१९॥ तिर्यो
स्तो निर्लोभान्सत्त्वापि बृहन्नीसमन्विता न ॥ पद्मपत्रं च वदीमानार्डिको त्थापिते ऽथ ॥२०॥ मधीचाजाविसामु
द्रुर्युन्का स्तिलन स्त्रवो नवेत ॥ श्वाल कवीज संयुक्तैः शास्तिकोद्भवं तुल्यैः ॥२१॥ सुपिष्टैः स्तिस्तन्संयुक्तौ स्तैलेनमुष्टानु
सब्धुस्तौ ॥ समिनामत्सुरूपया मांमहूँ पित्वा सुशोननम ॥२२॥ पचेद्रहति नरेखंडे स्निपिडानेन वेततः ॥ मांयावो
सोपुतश्चूर्णैश्चिपलामरिचार्द्रकैः ॥२३॥ मांसवर्गोद्भिया ज्ञेयो जांगलानूपनेस्त्वतः ॥ मांसवर्गे द्विजे ह्यालावि
२ स्थाभूगु ठास्याः ॥२४॥ तथापरा मिगाज्ञेया विष्किरा प्रतुदास्तथा ॥ प्रसहा चेतथा ग्राम्यास्त्वेष्टौ जांगलजातयः १२
॥२५॥ कूले चराः प्लवाश्चापि कोशस्थाः पादिनस्तथा ॥ मत्स्याश्चेते समाख्याताः पंचधानूपजातयः ॥२६॥
हरिणैणाकुरंगर्ष्य पृषतन्यंकु शंबराः ॥ राजीवोपि च मुंडी चेत्याद्या जांगला स्मृताः ॥२७॥ गोधा शशाभुजंगा
खुशल्लकाद्याः विलेशयाः ॥ सिंहव्याघ्रवृकाः ऋक्षतरक्षु द्वीपिनस्तथा ॥२८॥ बभ्रुजंबुकमार्जारा इत्या
द्याः कुगुहाशयाः ॥ वनौकसोऽथ वानरा मार्जार मर्कटिकादयः ॥२९॥ एते पर्णमृगाः प्रोक्ताः सुश्रुताद्यै
र्महर्षिभिः ॥ वर्त्तका लावविष्किरकपिंजलक तित्तिरिः ॥३०॥ कुलिंगकुक्कुटाद्याश्च विष्किराः समुदाहृताः ॥

23

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विकीर्यन्नन्त्यं त्येते यस्मात्तस्माद्विविष्किरा ॥ ३१ ॥ हारितो धवलः पाण्डुश्चित्रपन्हो हुडुन्हुकः पारावतः खंज
रीटः पिकाद्याः प्रतुदाः खगाः ॥ ३२ ॥ प्रतुद्यमन्त्यं त्येते तुंडेन प्रतुदास्ततः ॥ काकोगृध्र उलूकश्येनचिल्हशशघा
तकः ॥ ३३ ॥ चाषो भासश्च कुक्कुटाद्याः प्रसहाः खगाः ॥ छागमेषहरिणाश्वाद्या ग्राम्याः प्रोक्ता महर्षिभिः ॥ ३४ ॥
स्तुल्याः पशवो वाराहचमरीवारणोद्भवः ॥ एते कुलचराः प्रोक्ता यतः कूले चरंत्यपां ॥ ३५ ॥ हंससारसक्रौंचास्तु वे
ककौंचशारिकाः ॥ नदीमुखीसकारंडवार्द्धलोकाद्याः प्लवाः स्मृताः ॥ ३६ ॥ शंखशंखनखभ्राधिशुक्तिसंबुके
ककर्कटाः ॥ जीवा एवंविधाश्चान्ये कोशस्थाः परिकीर्तिताः ॥ ३७ ॥ कुंभीरकूर्मनक्राश्च गोधामकरसंकवः ॥ घंटिकः शि
शुमारश्चेत्याद्याः पादिनः स्मृताः ॥ ३८ ॥ मत्स्या रोहितपाठीनशकुलीवर्मिचंद्रिकाः ॥ राजीचिल्लिचिमाद्याश्चैता
न्यपाः प्रचोदिताः ॥ ३९ ॥ वल्लूरमामिषं शुष्कं शूल्यं शूलेन संस्कृतम् ॥ मत्स्यस्य पोतकं स्वल्पो ज्ञेयः क्षुद्रको म
त्स्यकः ॥ ४० ॥ शुभ्रश्चित्रपिष्टपिष्टातं गुडगुज्यव्योषान्वितं स्यात् रिक्तवेशवारः ॥ ४१ ॥ सौरवस्त्रासखिद्धे योनसोयो
ल्लवनस्तनुः ॥ स एव वेशवारेण मिश्रः खानिघृतचैति ॥ ४२ ॥ इति मांसान्नप्रकरणम् ॥ अथाहारित प्रकरणम् ॥
हितानुविपरीतं यद्दहितं तत्प्रकीर्तितम् ॥ विरुद्धं विपर्यतो दुग्धदध्यादिद्रव्यभोजनम् ॥ १ ॥ संकीर्णाशनमन्यैस्तु पथ्य ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पथ्यं विमिश्रितम् ॥ भुक्तस्योपरि यद्भुक्तं तदध्यशनमुच्यते ॥ ३ ॥ अकाले बहु वाल्पं वा भुक्तं तु विषमाशनम् ॥ य
त्किंचिद्दोषमुत्क्लेश्य न हरेत्तत्समासतः ॥ ३ ॥ विरुद्धं तापि संयोगात् क्षीरमत्स्यादि भोजनम् ॥ शाकक्षीरान्नेन य
नोरन्नाराजिकाक्षीरं द्वेशः ॥ ४ ॥ प्रायश्चरति यो नूनं मांसतुमत्स्यादि शीली विमः ॥ मेदासीसुकमेरस्यात्पूर्ववा
सीस्नेहुः शुका ॥ ५ ॥ स्थावरं जंगमं दूषी विषं चेति विषं त्रिधा ॥ मूलपत्राद्यधिष्ठानं विषं स्थावरमुच्यते ॥ ६ ॥ जं
गमं सर्पलूतादिदंष्ट्रालालादिसंस्थितम् ॥ दूषीविषं तु विज्ञेयं स्थावरं जंगमं चापि विषं च तत् ॥ ७ ॥ प्राग्वाताजीर्णशी
२ तामहिवास्तत्र प्राप्तिशनैः ॥ दूषयेद्धातून् तद्दूषीविषं स्मृतम् ॥ ८ ॥ नानाप्रकारपाकं साध्य विरुद्धौषधमश्न १२
तां ॥ विषाणां चाल्पवीर्याणां योगो गर इति स्मृतः ॥ ९ ॥ विषप्रकृतिकायानां दोषदूष्यादिसंगमे ॥ विषमंक
स्मुद्दिष्टं धातस्येकोत्र जीवती ॥ १० ॥ इत्यजीर्णसंज्ञाप्रकरणम् ॥ अथ स्वरसादिप्रकरणम् ॥ रसः कल्कः शृतः शी
तः फाण्टश्चेति प्रकल्पनाः ॥ पंचैव कषायाणां पूर्वं पूर्वं बलाधिका ॥ १ ॥ सद्यः समुद्धृतात्क्षुण्णाद्यः स्रवेत्पट
पीडितात् ॥ स्वरसः स समुद्दिष्टः कल्कः पिष्टो द्रवाप्लुतः ॥ २ ॥ चूर्णो क्वाथः शृतः क्वाथः शीतो रात्रिं द्रवे स्थितः ॥ स
द्योभिषुतवतत्काले कोद्रव्यात्स्य संग्रहः ॥ ३ ॥ द्रव्यादापल्लाद्विपिष्टात्कल्काः श्रुताः स्मृतः ॥ सद्रव्यं नानवतत्त्वस्य
त्या पुनस्यापयोजनात ॥ ४ ॥ सर्वद्रव्याणि पलिकान्याहुः ॥ द्रव्येषु वस्त्रेण प्रयोगे कल्कः उच्यते ॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कल्कस्यापि च लेपानां चापि पुनर्नमुदीरितम्॥ चूर्णस्य केवलस्यापि प्रोक्तेहति मे ह्यस्तयोरपि॥ ६॥ अथ शाकस्य पेयात्याज्ञा स्नमस्तेगुरु
रोपि ना॥ कषाय स्वरसानां च॥ गुटिकापि न मिश्रिते॥ ७॥ चूर्णस्थ च तेऽन्ह: संख्याता राकेरादिभिः॥ केनस्नेहो क्वाथमेदा वेवं पंचे
वेकस्यना॥ ८॥ इति स्वरसादिसंज्ञाप्रकरणम्॥ ४॥ अथ मानकथना॥ षड्वंशो मिलिता मरीचि स्यात्तैः षड्भिस्तु राजीका तु
स्ताभिस्तिसृभिः सर्षपो यवोऽष्टसर्षपैर्गुंजा यवचतुष्टयम्॥ तिस्रो माषके हेमधान्यकौ परिकीर्तितौ नाश्चतुर्भिर्माषकैः शाणो निष्कः टंकको च
धरणास्तौ द्वन्द्वतः क्षुद्रकः॥ १॥ कोलोऽसौ वटकोऽपि नो तु पिचकः कर्षोमराज्ञो किंकः पाणिः षोडशीका कवलग्रह करमध्यो माणि
कापाणिना॥ अन्ते हंसपदं कौविडालपदं किंचित्तिन्दुकाः कांचनेनाम्न्यमष्टमिका च शुक्तिरपि ते चानुर्थिकाख्यो उशी॥ २॥ मुष्टि
बिल्वपलप्रकुंचसहस्तेप्रसृतं प्रसृतिकामामहे शरावकोपि कुडवं चाष्टमानांजली॥ नौ मानी च शरावकोपि सहस्रप्रस्थस्तु
नाम्ना चतुःप्रस्थैराढकं कंसमाजनमथ द्रोणाढ्वत् चतुर्भिर्ज्जननः॥ ३॥ कुम्भाणाः कलशोर्मणोपि सद्वेदणाश्च स्तथानल्वणास्तौ स्सर्यः
कलशाः शरावकाश्चतुःषष्टिश्चनोगोणीका॥ द्रोणी सैव वहश्चतुर्भिरपि तैः खारीशतानां स्तातुलामानो विंशतिभिस्तुलाभिर्भिन्न
मानं स्मृतं भारसंघं॥ ४॥ गद्याने पि चतुरपि षट्कं भाव मासा मुष्टिः स्यादशघरतः कलिंगमाने॥ ५॥ वमने च विरेके च तथा शोणी
तमोक्षणे॥ सार्द्धत्रयोदशपलं प्रस्थमाहुर्मनीषिणः॥ इति मानसंज्ञाप्रकरणम्॥ अथ स्नेहनं० स्वेदनं० पंचकर्म० धूमपानं०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यं रूक्षकरं ० पुनिसारता ० मुखशोषप...र्द्दैन्यं ० दश्रुतेबोजनं ० तर्पणं ० पुष्टपाकं ० स्नेहाः ॥ सर्पिर्मज्जा वसा तैलं स्नेहेषु प्रवरं म
तम् ॥ द्वाभ्यां त्रिभिश्चतुर्भिस्तैर्यमकस्त्रिवृत्तो महान् ॥ ५ ॥ वसा मज्जाभिषस्नेहो मज्जा स्नेहोऽस्थिसंभवः ॥ रसभेदैककल्पाभ्यां चतुः
षष्टिर्विचारणाः ॥ ३ ॥ स्नेहस्य पानाभिमूलत्वात्स्यात्त्वाच्चक्रमात्स्मृताः ॥ यथोत्तरोत्तमाबाह्या नाह्योयो विचारणा ॥ ४ ॥ द्वा
भ्यां चतुर्थषष्ठाभ्यां मैर्जीर्यति या क्रमात् ॥ ह्रस्वमध्योत्तमा मात्रास्ताः स्नेहस्य विदुर्बुधाः ॥ ५ ॥ ह्रस्वे जीर्णे ए वा स्नेहे घृतमुत्तम
मात्रया ॥ अनन्नं युज्यते यत्र ज्ञेयं जीर्णाति कांचनतत् ॥ ६ ॥ ह्रस्वया मात्रया पानेषु तं मन्तो मनं नत्वम् ॥ युज्यतेऽपत्र सामात्रा प्राग्भ
४ क्तेत्यभिधीयते ॥ ७ ॥ अवपीडकमेतच्च संज्ञितं योजनाद्द्वयम् ॥ स्वेदस्तापोपनाहोष्मद्रवभेदाच्चतुर्विधः ॥ ८ ॥ तापोऽग्नितप्तव १४
सनफालहस्ततलादिभिः ॥ उपनाहो वचाकिण्वशताह्वादेवदारुभिः ॥ धान्यैः समस्तैर्गन्धैः रस्नामांसैरुरुःशीवादिभिः ॥ ९ ॥ पिं
डः कुंभीनाडिकाशंकरास्थोताकः कृपोष्धघनाश्मकुटी च ॥ ऊष्मस्वेदः स्मृतोऽनेकः सुरष्ठीवाध्याबैधैः संधैरेयुक्तितो बा ॥
॥ १० ॥ परिषेकावगाहाभ्यां द्रवाख्योऽपि द्विधा मतः ॥ परिषेकोऽंगे क्वाथादिस्थूलधारानिपातनम् ॥ ११ ॥ अवगाहः स्यात्स्नेह
दिपूर्णे द्रोण्यां निमज्जनं ॥ काकोल्यादिः सवातघ्नः सर्वाम्लद्रवसंयुतः ॥ १२ ॥ सानूपमांसः सुस्विन्नः सर्वस्नेहसमन्वितः ॥ सु
खोष्णाः स्पष्टलवणाः सान्वाः परिकीर्तितः ॥ १३ ॥ पंचकर्मवमीरेको निरूहोऽन्वासनावनम् ॥ ऊर्द्ध्वभागेन दोषाणां हरणं वम

27

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नास्यम ॥१३॥ अधोभागे मलादीनां हरणं स्याद्विरेचनम् ॥ मलानां रेचनादेष ज्ञेयमुन्मर्यं वा विरेचनम् ॥१४॥ अज्ञाविमहिषादीनां
बस्तिनादीयते यतः ॥ अतो बस्तिरिति ख्यातमथवा पूर्वमन्वेति यन्नतः ॥१५॥ आस्थापनमनुवासनमुत्तरबस्तिश्च स त्रेधा ॥ आस्थापनस्य
पर्यायो निरूहश्च निगद्यते ॥१६॥ आस्थापनं तु दोषाणामास्थापनाद्वयसो पि वा ॥ शरीररोहणाद्वापि दोषनिर्हरणादपि ॥१७॥
अचिन्त्यवीर्यभावाच्च तथाचिन्त्यप्रभावतः ॥ अस्मिन्नुहासेनवाद्वा निरूह इति संज्ञितः ॥१८॥ ततश्चेमानः शोधनं स्वशमनो रेचन
स्तथा ॥ पिच्छाबस्तिर्दृहन स्ववाजीकरणस्तथा ॥१९॥ माधुतैलिकमित्याद्या स्तस्य भेदाः प्रकीर्तिताः ॥ माधुतैलिकपर्यायाः सिद्धबस्तिश्च
यापनः ॥२०॥ दोषघ्नो युक्तरथश्चत्वारः सप्रकीर्तिताः ॥ अन्वासः स्यात्स्नेहबस्तिरनुवासोऽनुवासनं ॥२१॥ यतश्वासावनुवसन्नापि नैव
प्रदुष्यति ॥ अतोनुवासनेनापि वासनं चानुदीयते ॥२२॥ ह्रस्वया स्नेहपानस्य मात्रया योजितः समः ॥ मात्राबस्तिर्मतः स्नेहो मेदोन्वासस्य स
स्मृतः ॥२३॥ निरूहादुत्तरं बाप्युत्तरमार्गेण यो ॥ मार्गेण्यां दीयते यस्मात्तस्मादुत्तरपूर्वकः ॥२४॥ इतान्यन्त्रा गुदे न्देष्या स्नान्या॰
स्वो गुहसान्निभा ॥ मलप्रवर्तिनी वर्तिः फलवर्तिरिति स्मृता ॥२५॥ नस्यं तत्कथ्यते धीरैर्नासाग्राह्यं यदौषधम् ॥ नावनं नस्तकर्म्मेति तन॰
स्य नामांतरं मतम् ॥२६॥ विरेचनं बृंहणं च शमनं चेति तत्त्रिधा ॥ स्नेहनस्य प्रभेदौ द्वौ बृहुन्नाल्पल्वतो मतौ ॥२७॥ मर्शश्च प्रतिमर्शश्च
नस्य कल्काद्रियस्य तु ॥ अवपीडो भ्रूद्वेरकोश्थ दुतिन्द्राल्वतो मतौ ॥२८॥ द्वौ भेदावथ चूर्णो नैरेचनं तु तते च यत् ॥ नस्यं प्रधमनं तत्स्यादेवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्पंचधामतं ॥२९॥ नास्यो ह्यास्तनयनमर्द्धेमुस्थिधनेमतं ॥ धूमस्तावत्तुर्विधः प्रोक्तः शमनो बृंहणस्तथा ॥३०॥ शोधनः कासहा स्वैववाम
नोबृणाधूपनः ॥ तत्रार्थतः समानाः शमनः प्रायोगिको मध्यः ॥ अन्ये स्नेहो बृंहणस्तु स्वस्वमतेति पर्यायाः ॥३१॥ शोधनस्तीक्ष्णो विरे
चनसंज्ञाश्चान्येपितुल्यार्थाः ॥३२॥ गंडूषश्च चतुर्द्धा स्यात्स्नैहिकः शमनस्तथा ॥ शोधनो रोपणाख्यापि पर्यायाः शमनस्य हि ॥३३॥
निर्वापणस्तंभनश्च प्रसादन इति रिताः ॥ मुखं संचार्यते यानुसामात्राकवलः स्मृतः ॥३४॥ असंचार्यातु या मात्रा सगंडूषः प्रकीर्ति
तः ॥ कल्कोरसक्रिया चूर्णस्त्रिविधं प्रतिसारणम् ॥३५॥ दंतादिघर्षणं तत्तु गंडूषविहितौषधैः ॥ मुखालेपास्त्रिधा दोषविषहा व
र्णकृच्च सः ॥३६॥ त्रिप्रमाणाश्च ते तु मोगविभागार्द्धांगुलोन्नतिः ॥ अभ्यंगसेकपिचवो वस्तिश्चेति चतुर्विधं ॥३७॥ मूर्द्धतैलं बहुगुणं
तद्विद्याद्युत्तरोत्तरम् ॥ आश्च्योतनं स्यात्सेकस्तोतोनंतरमंजनम् ॥३८॥ लेखनं रोपणं दृष्टिप्रसादनमिति त्रिधा ॥ स्यादंजनं चतुर्द्धा तु
स्नैहिकेनापरे जगुः ॥३९॥ नेत्रे प्रयुज्यमानश्चूर्णस्तीक्ष्णांजनादिसंतप्ते ॥ प्रत्यंजनमिति संज्ञां लभते यस्तु प्रसादनो भवति ॥४०॥ त्र
३ विधमंजनमपरे प्रतिरससनेशादुधाः प्राहुः ॥ अथ मृदुतीक्ष्णा विरोधाजनद्रुस्तं ह्रि विधमेवान्ये ॥४१॥ पिंडौरसक्रिया चूर्णास्त्रिवि
धैवांजनकल्पना ॥ विडालको वहिर्लेपो नेत्रे पक्ष्मविवर्जितः ॥४२॥ यवमाषमयीपालीं नेत्रकोशाद्बहिः समां ॥ द्व्यंगुलोच्चां दृढां कृ
त्वानस्योत्तानशायिनः ॥४३॥ नेत्रे निमीलिते तस्मिन्नाम्यतीत्यादि च्युते ॥ निवाते युज्यते सर्पिस्तप्तं तु प्रविस्नापिते ॥४४॥ तत्तर्पणं प्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुंनीतपुटपाकमनंतरं ॥ सवातेस्नेहनः श्लेष्मसहितेस्नेहवनोहितः ॥४॥ हृद्रोर्वस्येनिरस्येपित्तेरक्तेस्वस्थेप्रसादनं ॥ पानीयः पुतिसा
रणीयइतिचन्दारोद्विधाप्रोच्यतेनवा योगवगुल्मकादिशामनेद्रुनामकादौपरः ॥४६॥ इतिस्नेहनादिन्द्रावातकर्मप्रकरणम् ॥११॥
अथमिश्रकसंज्ञाप्रकरणम् ॥ दाहः सर्वांगसंतापश्शोषस्त्वरतिधर्मवान् ॥ घ्राणोर्ध्वितिवदाहोंज्ञेयः प्रस्वेदविवर्जितः ॥१॥ हृद्दाहोशूल
वद्दाहोयोनर्द्दाहः प्रकीर्तितः ॥ स्वस्नमुखदाहस्त्वोष्ठेस्वथुस्वक्करादिषु ॥२॥ पाणिपादांसमस्तेषुसंतापोविविधस्मयः ॥ सविदाहइति
प्रोक्तःस्वच्छोङ्गिरशामस्तकः ॥३॥ ध्रमायनोशिरोग्रीवाकंवतास्तुषुधूमकः ॥ रक्तोदोदोस्तजःकार्ष्यंदौर्गंध्यंतनुतापिच ॥४॥ मांसर
क्तोरस्तविज्ञेयोमांसदौर्गंध्यकच्छान्ते ॥ निष्ठ्वतस्यावविषयाग्रहस्तंद्राप्रमीलकः ॥५॥ स्तैमित्यमवयवासामार्द्रपटेनावगुंठितत्व
मिव ॥ आर्द्रचर्मावनद्धंवयोगात्रंमन्यतेनरः ॥६॥ तथागुरुशरीरत्वंयंगौरवंतद्धिनिर्दिशेत् ॥ पित्वैकमशिसोच्छ्वासमुद्देष्टुनवि
हताननः ॥७॥ यंमुंचतिसनेत्रास्रसज्जंनइतिकीर्तितः ॥ आमाशयस्थःकायाग्नेर्दौर्बल्यादविपाचितः ॥८॥ आद्यआहारधातुर्यः
सआमइतिसंज्ञितः ॥ आमेनतेनसंसृष्टादोषादुष्याश्चदूषिताः ॥९॥ सामाइत्युपदिश्यन्तेयेचरोगास्तदुद्भवाः ॥ सरुग्गुरुगुरो
धाहृआटोपउदरेमतः ॥१०॥ आनद्धोस्तनानाहश्चोर्ध्वाधोवातरोधनः ॥ कोष्ठस्यगौरवाङ्गज्याशृहस्तप्रितितिस्मृता ॥११॥ वक्रोम
युरतानंद्राहृदयोद्वेष्टनंस्तमः ॥ नैवान्नममिकांक्षेतस्त्यानितस्यविनिर्दिशेत् ॥१२॥ हर्षनाविगतोत्साहोदुश्छायोमलिनन्द्रवि ॥ ह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वासो हृदयारीबद्धयथपद्देतु निर्गमः ॥ १३ ॥ यस्य नान्तेन वे हृद्दालो मलाछंस्कच्यते ॥ हृत्तोपो हृदयस्य स्याद्धृत्यासेनेव विप्लता ॥
१४ ॥ यस्य चानेन्नैनिःङ्गिलुप्तस्तुकरौवनेरितम ॥ हृदयं पिड्यते यस्य तस्योत ह्रक्लोशं विनिर्दिशेत ॥ १५ ॥ उत्क्लेशो हि वमनस्य केगोपास्थित
तिवया ॥ हृदयग्रहो मन्यते जेन हृद्गुष्टानि वपीड्या ॥ १६ ॥ हृदयस्यांतके दुरुवरुकविशेषो विकर्तिका ॥ वातात्वरोधो विष्टंभो मलरोधो विबंध
कः ॥ १७ ॥ निश्वारको निष्टननं विविधीनुप्रवाहिका ॥ प्रवाहिणी विसर्जिन्यौ संवसिष्यापावाल्लिनयम ॥ १८ ॥ गुदे कर्तनवत्पीडा विज्ञेया
परिकर्तिका ॥ अष्टीला नृहरेग्रंथिः प्रोन्नतः सतु जेखन ॥ १९ ॥ अधः प्रतिहतो वायुः श्लेष्मरागमाकृतेन च ॥ करोति नित्यमुद्गारमुर्द्ध
१६ वातः स उच्यते ॥ २० ॥ योनायासः श्रमो देहे प्रवृत्तस्वासवर्जितः ॥ क्लमः स तु विज्ञेय इंद्रियार्थप्रवाहिकः ॥ २१ ॥ श्रमः कर्मेंद्रियाणां स्या
त्स्वव्यापारासमर्थता ॥ भ्रमश्चक्रस्थितस्येव संभ्रमद्वस्तुदर्शनम ॥ २२ ॥ स्वदेहभ्रमनज्ञानं वा बुधः केचिद्विरे ॥ मदः स्वमुकधन्तूरन
न्हरोनेवमन्तता ॥ २३ ॥ मूर्छा संमोहयोर्ज्ञाननं शेनुल्येपि भिन्नता ॥ शरीरपातापाता न्योमथ्या विभिविमायनं ॥ २४ ॥ तृषापिवेदनाया
स्याद्धिक्लिष्टस्येव सर्वदेः ॥ स्त्वस्तम्लस्मः शीताः शीताः पिटिकाः पिटिकामताः ॥ २५ ॥ वरटी दष्टनिकाशः कंडूमान्लोहितस्तुकफपित्तातः ॥
न्द्राणि कोत्या रविनासः कोठ इति निगद्यिततज्ञैः ॥ २६ ॥ शीतपानीयसंस्पर्शाच्छीतकाले विशेषतः ॥ सरागके दूर्थ्यः शोफः स उदर्दः कफोद्
वः ॥ २७ ॥ मज्यमानेध्विवांगेषु दुःखं यस्यांगमर्दकः ॥ स्वेदश्चैतुपारजं बोतकरमूर्छावमोहिनी ॥ २८ ॥ रुजा दिष्ट दृढिर्ग्रहितिसंरंमोथ्यास्यवेगता ॥

(३१)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपद्रवाणामस्त्रीत्वं वक्त्रं तु विपुलं मतम् ॥ २९ ॥ योनेरन्तर्नावा यास्त्रीणां रक्तस्रुतिः प्रदरः ॥ सीमन्तो मस्तके मार्गो न्वाना नावरौतिति पिच्छिलस्राव: ॥
॥ ३० ॥ किंकिसंगुकवन्तोरोवाल्लिवस्तितनोदरे ॥ कुमारस्य त्यागनिरापाः परिचर्या निगद्यते ॥ ३१ ॥ आधिक्षमानसं दुःखमाविर्दुःख
प्रकृतिजं ॥ शरीरायासजनकं कर्म व्यायाम उच्यते ॥ ३२ ॥ नियुद्धं बाहुयुद्धं स्यात्त्याः शाघातस्तोमर्दनम् ॥ संवाहनं स्यादंगस्य मुखस्य विमर्दनं
॥ ३३ ॥ गंधद्रव्यमस्तराद्यैः सोतमुद्वर्तनं स्मृतम् ॥ उद्धर्षणं त्विष्टकाद्यैर्लेपनं चंदनादिभिः ॥ ३४ ॥ अभ्यंजनं स्यात्स्नेहांगः स्नानं तु स्न
पनं मतम् ॥ पट्टोरवनं वस्त्रखंडं स्त्रवर्तिर्विकिरिका ॥ ३५ ॥ नक्तके पट्टलं प्रोतः संचकायोमतजः पिचुः ॥ वस्त्रखंडं मयी पालीवरोकव
लिका मता ॥ ३६ ॥ सोथस्य यद्धि लयनं तत्स्यां गुल्फादिमर्दनैः ॥ विल्लापनं जलौकाभिरस्रस्रावो वसेचनम् ॥ ३७ ॥ तालजे ताल्वेटेत
स्याद्रुतल्लेपो वर्हिपिच्छजः ॥ जलार्द्रा व्यजनं वास्त्री चामरं तु प्रकीर्णकम् ॥ ३८ ॥ उष्णीषः स्यात् छल्लाकारी शीर्षस्य परिवेष्टनम् ॥
अंतर्गतस्य त्वाकर्षः स्याच्चूषणमिति रितम् ॥ ३९ ॥ व्यूहनं च यथास्थाननिवेशः परिकीर्तितः ॥ हिद्रीरानलिका पिच्छनालिका वोस्के
हरे ॥ ४० ॥ मत्स्यस्यतालोमत्स्यताम्रनुचकं मुद्रिका मता ॥ यस्वांतरपन्नस्य स्यादुपपन्नस्य चतद्दृशि ॥ ४१ ॥ विशालका लेपनयो स्काल
स्कनिशा मता ॥ कालः सर्वमहः प्रोक्तो वेह्नासंमवात्यथवा ॥ ४२ ॥ कषायवर्मीतारून्त्वं सर्मत्वं समुदाहृतं ॥ कर्षणं लेखनमथन्हरा
नं न्हतमुच्यते ॥ ४३ ॥ वारंगशल्ये पार्श्वेंत स्त्रिशस्योच्छ्रूनतामता ॥ मृतालीस्यात्कुशमयी रज्जुवेष्टनिका लता: ॥ ४४ ॥ गुरुरूगन्नेभयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वका स्वल्पमेकं ... तद्धयात ॥ नित्यप्रवृत्तिकुशला स्वमना स्वोद्धि विशोधितम् ॥४५॥ जितेन्द्रियप्रिय ... परिणामे हितं शरीरं ॥ इति मिश्र
कसंज्ञानुपानं ॥१६॥ आयुर्वेदेनावसी द्रत्यमुष्मिन्ज्ञात्वा व्यासं प्राप्य सो वाग्लिशोपि ॥ युक्तायुक्तार्थं प्रयुक्ताभिधाभिः संज्ञाः सर्वाः
कः प्रवक्तुं समर्थः ॥१॥ संज्ञासमुच्चयमनुं लघुवाग्भटाद्यैर्ग्रंथ प्रकाशनकरं विदमस्य हेतु ॥ नाना द्रधीत विविधं वैद्य विद्यस्व
...दतनुर्मुनसुतः सिवदत्तमिश्रः ॥२॥ इति शिवदत्तमिश्र विरचितः संज्ञासमुच्चयः संपूर्णः ॥ शुभमस्तु ॥ सिद्धिरस्तु ॥०॥०॥०॥

कटुकि १

शुंठी शघिन्नैद्गुडं चैते सर्वा ... शाकानि च तिक्तकानि ॥ रात्रौ न सेवेत विदाहि चैतत् द्वातुर्दशयं न्हीणव लंकरोति ॥१॥ स्नानानुलेप
न हिमानि ... शीतांबु दुग्ध रसयूषसुराप्रसन्ना ॥ सेवेत वाकशयने विरतो ... पुनरेति धाम ॥२॥ ...
... कुंकुम ... जातीपुष्पैतैर्मोच्छार्क करा जमोदच विकाशं ... ॥ शुंठि ...
... गुणानेवं ... शीतांग रोगं जयेत ॥३॥०॥०॥ संवत १८१२ ... संपूर्णः ॥

शावर

गजाधिपत्र

K K S U LIBRARY
RAMTEK
441 106
M-1878
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=21.10.20 15:22
,TRANSFERRED=2020/10/21 at 15:27:03
,PAGES=33
,TYPE=STD
,NAME=S0004315
,Book Name=M-1878-SANGYASMUCHH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection